स्वर्णजयन्तीग्रन्थमाला-105

॥ श्रीराघवो विजयतेतराम् ॥

महर्षिपाणिनिप्रणीता

# अष्टाध्यायी

( वृत्तित्रयसमन्विता )

अइउण् ऋलृक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झभञ् घढधष्
जबगडदश् खफछठथचटतव् कपय् शषसर् हल्

**( प्रथमो भागः )**



वृत्तित्रयप्रणेता

श्रीचित्रकूटतुलसीपीठाधीश्वर-कविकुलरत्नमहामहोपाध्याय-
वाचस्पति-पदवाक्यप्रमाणपारावारपारीण-प्रस्थानत्रयीभाष्यकार-

**जगद्गुरुरामानन्दाचार्य-स्वामिरामभद्राचार्यः।**

( भारतराष्ट्रपतिना पद्मविभूषणेन सभाजितः )

स्वर्णजयन्तीग्रन्थमाला-105

।। श्रीराघवो विजयतेतराम् ।।

महर्षिपाणिनिप्रणीता

# अष्टाध्यायी

## ( वृत्तित्रयसमन्विता )

( प्रथमो भागः )

वृत्तित्रयप्रणेता
चित्रकूटतुलसीपीठाधीश्वर-कविकुलरत्नमहामहोपाध्याय-
वाचस्पति-पदवाक्यप्रमाणपारावारपारीण-जगद्गुरुरामानन्दाचार्य-
**स्वामिरामभद्राचार्यः**
**( भारतराष्ट्रपतिना पद्मविभूषणेन सभाजितः )**

सम्पादकः
**गोविन्दाचार्यः ( गोविन्दप्रसादशर्मा )**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**संसदः अधिनियमेन स्थापितः**
**( भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः )**
**नवदेहली**

॥ श्रीः ॥

# प्रथमखण्डस्य पुरोवाकम्

वन्दे वन्दारुमन्दारं पीतनीलाम्बुजत्विषम्।
सीतारामं परं ब्रह्म विशिष्टाद्वैतमव्ययम्॥
नमः शब्दमहाम्भोधिमन्दरायादराय च।
दाक्षीपणिनपुत्राय सूत्रकृच्चक्रवर्तिने॥
श्रीपाणिनिसमारम्भां श्रीहरिनारायणमध्यमाम्।
श्रीरामप्रसादपर्यन्तां वन्दे श्रीगुरुपरम्पराम्॥
स्वस्त्यस्तु वः पण्डितशेखरेभ्यः
स्वस्त्यस्तु वो बुद्धिमतां वरेभ्यः।
स्वस्त्यस्तु विद्याव्यसनप्रियेभ्यः
स्वस्त्यस्तु शब्दार्णवसत्सुधेभ्यः॥

सुविदितचरमत्र भवतां शुद्धशेमुषीधनानां भगवत्पाणिनिविद्यावदातयशस्सौरभम्। एषां कृते महाभाष्यकारः शेषावतारः स्वयं पतञ्जलिर्भगवच्छब्दविरुदं मुक्तकण्ठं समभणत्। **सिद्धं तु भगवत्पाणिनेः ( म०भा० ८.४.६८ )**। तामेव श्रीपाणिनिप्रणीतां भगवतीमष्टाध्यायीं रुद्रसंख्याधिकचतुःसहस्रसूत्रीं पतञ्जलिप्रभृतयो विद्वत्तल्लजाः सलज्जा इव व्याकार्षुः। यथा कात्यायनो वररुचिरुक्तानुक्तदुरुक्तानां विचारं कृत्वा वार्तिकानि, शेषावतारो भगवत्पादः पतञ्जलिरष्टाध्याय्याः प्रायः त्रिसहस्रसूत्रेषु महाभाष्यं च व्यधात्, प्रायशो वार्तिकखण्डनमुखेन, क्वचित् स्वयं वार्तिकानि पठित्वा, क्वचिद् इष्टिं च कृत्वा। पञ्चाशीत्याह्निकेषु पञ्चाशीत्या अहोभिरिदमष्टाध्यायीमहाभाष्यं महता प्रयत्नेनाकार्षीत्। तेषु पुनर्जयादित्यवामनप्रसादभट्टोजिदीक्षितहरिजीदीक्षितप्रभृतयः स्वस्वविचारेण व्याख्यां लिखितवन्तः। तेषु जयादित्यवामनयोः काशिकावृत्तिर्बहुख्यातिमगमत्। अनन्तरं भट्टोजिदीक्षितप्रभृतयो नव्यपद्धत्या अष्टाध्यायीं व्याचक्रुः। सर्वे यथासम्भवं प्रसारं कृत्वा ख्यातिमलभन्त। भगवत्कृपया अहमपि पूर्वाचार्याणां प्रसादेन सर्वेषां विदुषामाशीर्वादेनाष्टाध्यायीमिमां स्वरचिताभिस्तिसृभिर्वृत्तिभिर्मण्डयामि स्म। अहमपि सद्गुरुचरणसेवावाप्तसन्मतिरिमामेवाष्टाध्यायीं वृत्तित्रयेण सरलमकार्षम्। तत्र प्रथमा **रामभद्रीया वृत्तिः** संस्कृतगद्यमयी, पुनर्द्वितीया **राघवतोषिणी वृत्तिः** संस्कृतश्लोकमयी, पुनस्तृतीया हिन्द्यां **रामप्रसादिनी वृत्तिः**। आसु तिसृषु वृत्तिषु मया प्रत्येकं सूत्राणां पदच्छेदम्, सूत्राणां यथाबुद्धिस्फुरितां समासप्रक्रियाम्, यथावश्यकं शङ्कासमाधानानि, उद्धरणेषु यथासम्भवं श्रीरामकृष्णपरकाणि उदाहरणानि समभ्यदायिषत। वर्ण्यविषयाणां यथासंभवं संस्फोरणं पदार्थानां समीक्षा संरक्षा च समकारिषाताम्। तत्र

उञः इति सम्पूर्णं सूत्रमनुवर्तते। **षष्ठीस्थाने योगा (१.१.४९)** इत्यस्माद् भाविनोऽपि **स्थाने** इत्यपकृष्यते। **ऊँ** इति दीर्घत्वानुनासिकत्वप्रगृह्यतेति धर्मत्रयावच्छिन्नः।

सूत्राकारश्च सानुवृत्तिपदकः- अनार्षे इतौ उञः स्थाने शाकल्यस्य ऊँ इति प्रगृह्यः। इह विवदन्ते पूर्वे परे च प्राञ्चः, **उञ उ** इति सूत्रमेकं मन्यन्ते। अर्वाञ्चः उञः इत्येकं सूत्रम्, **ऊँ** इति पृथक् सूत्रं स्वीकुर्वन्ति। एवं तेषांमते सूत्रद्वयम्। वस्तुतस्तु इह सूत्रद्वयमुचितम्, एकस्मिन् सूत्रे स्वीकृते अर्थो भविष्यति- अवैदिके इतौ परे **उञः** स्थाने विकल्पेन दीर्घानुनासिकः प्रगृह्यश्च **ऊँ** इति आदेशः स्यात्। एवं च अत्र रुपद्वयमेव सिद्ध्येत्- **ऊँ** इति। आदेशाभावे **निपात एकाजनाङ्** इत्यनेन नित्यं प्रगृह्यसंज्ञायां प्रकृतिभावे **उञ् इति**, कथंचिदपि यण्सहितम् **विति** एवंविधं रूपं न सिद्ध्येत्।

सूत्रद्वयस्वीकारे तु चत्वारि रूपाणि। तथाहि- **उञ्** इति अस्यामवस्थायाम् **निपात एकाजनाङ् (१.१.१४)** इत्यनेन नित्यप्रगृह्यसंज्ञायां प्राप्तायाम्, **उञः (१.१.१७)** इत्यनेन प्रगृह्यसंज्ञा विकल्पिता **उञ्** इति, तदभावे **विति**, एवं द्वितीयसूत्रेण उकारस्य स्थाने दीर्घः अनुनासिकः प्रगृह्यः **ऊँ इति**, तदभावे **विति**। एवं सूत्रद्वये स्वीकृते चत्वारि रूपाणि एकस्मिन् स्वीकृते द्वे रूपे।

**उञः ऊँ इति वा प्रोक्तो ह्यवैदिक इतौ परे।**
**दीर्घोऽनुनासिकश्चैव प्रगृह्यश्च सहैव हि॥**

॥श्रीः॥

**(राघवतोषिणी वृत्तिः)**

**उञः ऊँ इति वा प्रोक्तो ह्यवैदिक इतौ परे।**
**दीर्घोऽनुनासिकश्चैव प्रगृह्यश्च सहैव हि॥१॥**
**आदेशस्याभावपक्षे गते चैवानुनासिके।**
**दीर्घे चैव निरस्ते हि प्रगृह्ये तु पराकृते॥२॥**
**उ इत्यस्यामवस्थायां यणादेशे प्रवर्तिते।**
**विति रूपं च सम्पन्नं चतुर्थं बुधसम्मतम्॥३॥**
**उञ् ऊँ इति चेत् सूत्रमेकमेव यदि स्थितम्।**
**स्यात्तदा रूपयुगलं भवेदनभिवाञ्छितम्॥४॥**
**एकं दीर्घः प्रगृह्यश्चानुनासिकसमन्वितः।**
**द्वितीयञ्च निपातत्वान्नित्यत्वेन प्रगृह्यकः॥५॥**
**तस्माद्योगविभागेन त्रिभिर्मुनिभिरादृते।**
**समाद्रीयेतां द्वे सूत्रे अलं विप्रतिपत्तिभिः॥६॥**
**एकसूत्रे कृते चैव उञ् इत्यस्य प्रगृह्यता।**
**तदभावे विकल्पेन यणादेशः प्रकीर्तितः॥७॥**

स्वर्णजयन्तीग्रन्थमाला-106

॥ श्रीराघवो विजयतेतराम् ॥

महर्षिपाणिनिप्रणीता

# अष्टाध्यायी

## (वृत्तित्रयसमन्विता)

(द्वितीयो भागः)

वृत्तित्रयप्रणेता
चित्रकूटतुलसीपीठाधीश्वर-कविकुलरत्नमहामहोपाध्याय-
वाचस्पति-पदवाक्यप्रमाणपारावारपारीण-जगद्गुरुरामानन्दाचार्य-
**स्वामिरामभद्राचार्यः**
(भारतराष्ट्रपतिना पद्मविभूषणेन सभाजितः)

सम्पादकः
**गोविन्दाचार्यः (गोविन्दप्रसादशर्मा)**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**संसदः अधिनियमेन स्थापितः**
(भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः)
**नवदेहली**

श्रीमद्राघवो विजयते

## महर्षिपाणिनिप्रणीता

# अष्टाध्यायी

## तत्र द्वितीयाध्याये प्रथमः पादः

(रामभद्रीया वृत्तिः)

**सामर्थ्यं कलयन् स्मरन् विकलयन् शोभाव्ययी भावतः,**
**राजत्तत्पुरुषः समस्तविभवः स्निग्धो बहुव्रीहिमान्।**
**सद्वन्द्वो द्विगुकर्मधारयमयो विभ्व्या विभक्त्यान्वितः,**
**रामो रक्षिततद्धितो विजयते सीताद्वितीयो हरिः॥१॥**

**स्तुवे व्याकरणाम्भोधेर्ललामानीव भासुरान्।**
**भास्वरान् भास्वतो भासा त्रीन् मुनींस्त्रिदशानिव॥**

अथ द्वितीयाध्यायः। तत्र प्रथमं समासः। यद्यपि पाणिनीयनये समासः षड्विधः- सुबन्तस्य सुबन्तेन प्रथमः, सुबन्तस्य तिङन्तेन द्वितीयः, सुबन्तस्य नाम्ना तृतीयः, सुबन्तस्य धातुना चतुर्थः, तिङन्तस्य तिङन्तेन पञ्चमः, तिङतस्य च सुबन्तेन षष्ठः। अतः कारिका-

**सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।**
**सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥**

इत्यन्तरङ्गभेदः। अपरः षड्विधः समासः- अव्ययीभाव-तत्पुरुष-बहुव्रीहि-द्वन्द्व-भेदाच्चतुर्विधः। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानश्च द्वन्द्वः। तत्पुरुषोऽपि कर्मधारयो द्विगुश्चेति द्विविधः। द्वावपि समानाधिकरणौ। द्वन्द्वोऽपि द्वेधा, इतरेतरयोगः समाहारश्च। तत्र पूर्वं समस्तपदानां सामर्थ्यं वर्णयति-

### समर्थः पदविधिः २.१.१॥

(रामभद्रीया वृत्तिः)

**समर्थः** इति प्रथमैकवचनान्तम्। **पदविधिः** इति प्रथमैकवचनान्तम्। द्विपदमिदं सूत्रम्। पदानां विधिः पदविधिः। सम्बन्धे षष्ठी। सम्बन्धश्च उद्देश्यविधेयभावरूपः। यद्वा पदसम्बन्धे विधिः पदविधिः। मध्यमपदलोपिसमासः। इदं तु दीक्षितानुरोधेन।

यावत्-शब्द निश्चय अर्थ को नहीं कह रहा है। जितना दिया उतना खाया, खाने में कोई निश्चय नहीं है।

●।।श्रीः।।●

## सुप् प्रतिना मात्रार्थे २.१.९।।

### (रामभद्रीया वृत्तिः)

**सुप्** इति प्रथमैकवचनान्तम्। **प्रतिना** इति तृतीयैकवचनान्तम्। **मात्रार्थे** इति सप्तम्येकवचनान्तम्। त्रिपदमिदं सूत्रम्। **सुप्** इति प्रत्ययग्रहणपरिभाषया तदन्तं गृह्यते। अत्र मात्रार्थे इति सप्तमी प्रत्युपसर्गेण सहान्वेति। मात्रा च बिन्दुः, स्तोकम्, अल्पम्, लेश इति पर्यायाः। तस्या मात्राया अर्थे वर्तमानेन प्रत्युपसर्गेण समर्थेन सह सुबन्तं समस्यते सोऽव्ययीभावः। अस्त्यत्र किञ्चित् शाकम् इति **शाकप्रति, सूपप्रति।** सूपस्य लेश इति भावः। इह प्रत्युपसर्ग एव मात्रार्थं द्योतयति, तेन शाकसूपादीनां सुबन्तानां समासोऽव्ययीभावः। अस्वपदविग्रहे समासोऽयम्। यद्यपि **सुबामन्त्रिते पराङ्गवत्स्वरे** इत्यतः सुप् पदमनुवर्तयितुं शक्यते स्म, तथापि तदकृत्वा पुनः सुप्-ग्रहणम् अव्ययानुवृत्तिनिवृत्त्यर्थम्। अन्यथा **प्रतिना मात्रार्थे** इत्येवं सूत्र्येत। अनुवृत्तं सुप् अनुवृत्तस्याव्ययमिति पदस्य विशेषणं स्यात्। तदा मात्रार्थकप्रत्युपसर्गेण सह सुबन्तमव्ययमेव समस्येत, न तु सामान्यम्।

नन्वारम्भसामर्थ्यादेव अव्ययं सुबन्तं न समस्येत, मैवम्। **नक्तम्मन्यमहः, अहर्मन्यं नक्तमि**तिवृत्तिविषये सत्त्वप्राधान्यदर्शनेन सत्त्वप्रधानमव्ययं समस्येत एव। दिवसस्य लेशः **दिवाप्रति**, रात्रेर्लेशो **नक्तम्प्रति** इत्यनिष्टप्रयोगवारणाय पुनः सुब्ग्रहणम्। तेन मात्रार्थे वर्तमानेन प्रतिना सह अव्ययभिन्नमेव सुबन्तं समस्यते। **तण्डुलप्रति, घृतप्रति** इत्यादि।

सत्त्वप्रधानमव्ययम्। नक्तं प्रातर्दोषा इत्यादि न समस्यते इति सिद्धान्तयितुं पुनः सुब्ग्रहणम्।

ननु **सुप्प्रतिना** इत्येव सूत्र्यताम् **मात्रार्थे** इति किमर्थम्? तदभावे वीप्साद्यर्थेषु वर्तमानेन प्रतिना सह सुबन्तं समस्येत। **वृक्षं वृक्षं प्रति विद्योतते विद्युत्** इत्यादि स्थलेऽनिष्टप्रयोगः स्यात्। न च **लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः (१.४.९०)** इति सूत्रारम्भसामर्थ्यात् तत्र द्वितीयागर्भवाक्यमेवेति वाच्यम्, **वृक्षं वृक्षं परिसिञ्चती**त्यादौ कर्मप्रवचनीयसंज्ञकत्वेन मूर्धन्यनिषेधे तस्य सावकाशत्वादत्र समासविधेर्दुर्निवारत्वात्। मात्रार्थे इति पदं समुचितमेव।

**मात्रा बिन्दुस्तथाऽल्पं च तदर्थे प्रति यत् स्मृतम्।**
**समस्यते सुबन्तेन सोऽव्ययीभाव उच्यते।।**

।।श्रीः।।

## ग्रन्थकर्तुः परिचयः



रामभद्रो हि जानाति रामभद्रसरस्वतीम्।।
रामभद्रो हि जानाति रामभद्रसरस्वतीम्।।१।।
राजदेवशचीपुत्रो वासिष्ठो वैष्णवो द्विजः।
गीताभ्राता रामभद्राचार्यो गिरिधरः कविः।।२।।
पदवाक्यप्रमाणाब्धिपारीणः शास्त्रलोचनः।।
अन्येषां चाप्यनेकेषां ग्रन्थानां भाष्यकृत्सुधीः।।३।।
संस्कृते यो महाकाव्यत्रयीमकृतशोभनाम्।।
हिन्द्यामपि महाकाव्यद्वयीं यो व्यदधाद् बुधः।।४।।
पाणिनेरष्टके चास्मिन् सोऽयं वृत्तित्रयीं व्यधात्।।
सीतारामपदप्रीत्यै मोदाय विदुषां सताम्।।५।।
तुलसीपीठाधिपतिर्जगद्गुरुत्वेन यः समाम्नातः।।
रामानन्दाचार्यः कर्ता ग्रन्थस्य चास्यासौ।।६।।


केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
दूरभाष : 011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in website : www.sanskrit.nic.in